# FIRST YEAR SANSKRIT HONOURS
# 3RD PAPER (KADAMBARI-SUKANASOPADESH)

कथायाः उद्गमभूमिर्भारतवर्षमेव। अधुना षाश्चात्त्या अपि कथाय गौरवं स्वीकुर्वन्तु नाम, परन्तु ते कथाया आधारं भारतीयकथात् एव लब्धवन्तः। पाश्चात्त्यकथाया इतिहासं जानन्तो विद्वांसः प्रतियन्ति यद् भारतभूमिरेव कथाया उत्पत्तिक्षेत्रम। षष्ठशताब्द्याम् भारते ताः कथाः प्रचुरप्रचारा आसन् यासामुपलब्धिरस्माभिः पञ्चतन्त्रे क्रियते। पञ्चतन्त्रेण विश्वसाहित्ये महदुपयोगि दानं समर्पितम्। वेदादेव प्रवहन्ती पुराणेषु खरस्रोतस्त्वमागता कथाधारा नानारुपाऽजायत।

संस्कृते कथायाः द्वौ प्रकारौ –उपदेशात्मककथा, मनोरञ्जककथा च। प्रथमा पशुपक्षिकथा, द्वितीया मनोरञ्जनमात्रफला मानवकथा। मनोरञ्जककथानां प्राचीनतमः संग्रहो बृहत्कथा इति नाम्ना प्रथते।

श्लोकसंग्रहः

बृहत्कथामञ्जरी

कथासरित्सागरः

वेतालपञ्चविंशतिका

सिंहासनद्वात्रिंशिका

शुकसप्ततिः

अवदानशतकम्

दिव्यावदानम्

जातकमाला

उपमितिभवप्रपञ्चकथा

परिशिष्टपर्व

कथासाहित्ये पशुपक्षिकथाः

विकिपीडिया, कश्चन स्वतन्त्रः विश्वकोशः

पञ्चतन्त्रम्

एकम् कथा

एकम् कथा

संस्कृतभाषायां विविधाः कथाः प्राप्यन्ते। प्रथमाः मनोरञ्जनमात्रफलाः बृहत्कथाप्रवर्त्तितरुपाः द्वितीयाश्च पञ्चतन्त्रप्रवृत्ताः सदाचारराजनीत्योः शिक्षाप्रदायिन्यः। अनयोर्बाह्यरुपसम्येऽपि आन्तरिकस्वरुपे महदन्तरम्। अतो बृहत्कथापथप्रवृत्ताः कथा लोकप्रियकथाशब्देन पञ्चतन्त्रपथप्रवृत्ताश्च कथाः शिक्षाकथायां पशुपक्षिकथाशब्देनाभिधातुं शक्यन्ते।

पशुपक्षिकथाविकासः

वैदिकसाहित्ये ईदृश्यः कथा न सन्ति। छान्दोग्योपनिषदि सत्यकामस्य ऋषभहंसादिसकाशाद् ब्रह्मज्ञानं लभमानस्य कृते पशुपक्षिकथाया बीजं दृश्यते। महाभारते पशुपक्षिकथानां स्वरुपं किञ्चित् स्फुटम् तत्र मार्जारमूषककथायां धृतराष्ट्रं प्रत्युपदेशः प्रकाशितः।

बौध्द्धर्मप्रचारेणेदृशकथासाहित्यस्य महानुदयो जातः। स्वधर्मप्रचाराय बौध्दैर्विविधाः पश्वादिकथाः प्रथिताः। भरहुत नामके स्थाने यद् बौध्दानां स्मारकमुपलब्धं तेन खीष्टपूर्वद्वितीयशतके पश्वादिकथायाः प्रचार सिध्यति। नीतिशिक्षार्थं प्रवर्त्तितासु कथासु पञ्चतन्त्रकृता नीतिशास्त्रात् अर्थशास्त्राच्च विपुला सामग्री संगृहीता।

मनवे वाचस्पतये शुक्राय पराशराय ससुताय।

चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्त्तृभ्याः ॥

इति पञ्चतन्त्रस्य भूमिकायां नामस्कारविधया नानानीतिशास्त्रकृतामुल्लेखो दृश्यते। तदयं पञ्चतन्त्रनामा पशुपक्षिकथाप्रभेदा नितरां शिक्षाप्रदो विद्यते। अयं पञ्चतन्त्रग्रन्थः कतिचनान्यानपि ग्रन्थानाधारीकरोति। वेतालपञ्चविंशतिका, शुकसप्ततिः, सिंहासनद्वात्रिंशतिका, हितोपदेश इत्यादयो ग्रन्थाः पञ्चतन्त्रमेवाश्रित्य निर्मिता इति प्रसिध्दम्।

पञ्चतन्त्रस्य पञ्चाशद्भाषास्वनुवादो जातः इति ग्रन्थस्यास्य लोकप्रियता प्रत्यायिता भवति। भारतवर्षस्यानेकासु भाषासु अन्यदेशभाषास्वपि च पञ्चतन्त्रस्यानुवादो दृश्यते। संसारे धर्मग्रन्थानतिरिच्य केनाप्यन्येन लौकिकग्रन्थेनैतावानादरो नाधिगतः इति कथनभूतार्थव्याहृतिरेव।

## गद्यकाव्यम्

१ इतिहासः
२ गद्यपद्ययोः भेदः
३ प्रकारः
४ गद्यकाव्यानां प्राचीनता
५ गद्यकाव्यानि
५.१ वासवदत्ता
५.२ बृहत्कथा
५.३ हर्षचरितं, कादम्बरी च
५.४ दशकुमारचरितम्, अवन्तिसुन्दरीकथा
५.५ तिलकमञ्जरी
५.६ गद्यचिन्तामणिः
५.७ मन्दारमञ्जरी
५.८ रत्नावली
५.९ शिवराजविजयः
५.१० कौमुदीकथाकल्लोलिनी
६ सम्बद्धाः लेखाः
७ सन्दर्भः

**इतिहासः**

यदा वेदमन्त्राः द्रष्टृणाम् ऋषीणां दृष्टिगोचरा अभवन्, तदा प्रथमतया गद्यरूपेणैव प्रादुरभूवन्। यथा-

"सह वै देवानां चासुराणां च यज्ञौ प्रततावास्तां वयं स्वर्गमेष्यामो वयमेष्याम इति इति तेऽसुराः सन्नह्य सहसैवाचरन्" (यजुर्वेदः)।

कृष्णयजुर्वेदे एतादृशाः अनेके मन्त्राः उपलभ्यन्ते, ये च प्राचीनतमां गद्यशैलीं प्रख्यापयन्ति। अतः एवं ज्ञातुं शक्यते यत् यस्याः कस्या अपि भाषाया प्रथमो विकासः गद्यरूप एव भवितुमर्हति। संस्कृते तु वेदोपनिष्दां साहित्यराशिम् अवलोकयामश्चेत् गद्यप्रकारः शनैः शनैः विकचीबभूवेति अवगन्तुं शक्यते। वेदानां काले यादृशि गद्ये साहित्ये विदुषाम् अभिरुचिः आसीत्, न खलु तदुत्तरकाले। गीतेषु, पद्येषु, छन्दस्सु च जनप्रियता यदाऽवर्धत तदा गद्यसाहित्यनिर्माणेऽपि वैरल्यं दृश्यते। किन्तु महाभारतेतिहासेऽपि तत्र तत्र गद्यप्रयोगाः अवलोक्यन्ते। यथा-

स तथेत्युक्त्वा तमश्वमधिरुह्य प्रत्याजगामोपाध्यायकुलमुपाध्यायानी च स्नाता केशानावापयन्त्युपविष्टोत्तङ्को नागच्छतीति शापायास्य मनो दधे।

सार्धद्विशतवर्षेभ्यः पूर्वमेव गद्यप्रकारस्य हृद्यताम् अवगत्य भगवान् यास्कः "निरुक्तम्" स्वग्रन्थं गद्ये प्रायुङ्क्त। ततः गच्छता कालेन शास्त्रग्रन्थाः व्याख्यानग्रन्थाः च हृद्ये गद्ये निरमीयन्त। तत्रैकम् उदाहरणं "महाभाष्ये" पश्यामः। यथा-

एवं हि श्रूयते। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। बृहस्पतिश्च प्रवक्तेन्द्श्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम। इति।

महर्षिः चरकः अपि चरकसंहितायां गद्यं प्रयुक्तवान्। यथा-

नारत्नपाणिर्नास्नातो नोपहतवासा नाजपित्वा नाहुत्वा देवताभ्यो नानिरूप्य पितृभ्यो नादत्वा गुरुभ्यो नातिथिभ्यो नोपाश्रितेभ्यो नापुण्यगन्धो नाऽप्रक्षालितपाणिवदनो नाशुद्धमुखो नोदङ्मुखो न विमना न प्रतिकूलोपहितमन्नमाददीत। इति।

तत्वशास्त्राणां दर्शनशास्त्राणां व्याकरण-ज्योतिष-न्यायायुर्वेद-मीमांसादिशास्त्रग्रन्थाः तु विपुलतया गद्येऽतन्यन्त इति तु नाविदितं विद्वद्भिः। महामनाः कौटल्यः स्वकीये कौटलीयम् अर्थशास्त्रम् इति ग्रन्थे यथा सुन्दरं गद्यं प्रायुङ्क्त अवलोक्यताम्।

"दर्शने प्रसीदति। वाक्यं प्रतिगृह्णाति। आसनं ददाति। विविक्तो दर्शयते। शङ्कास्थाने नातिशङ्कते। कथायां रमते। परिज्ञाप्येष्ववेक्षते। पथ्यमुक्तं सहते। स्मयमानो नियुङ्क्ते। हस्तेन स्पृशति। श्लाघ्ये नोपहसति।"

गद्यपद्ययोः भेदः

यदि हि काकतालीयन्यायेन कदाचिद् गद्येऽपि लयात्मकता उत्पद्यते, तदापि गद्यं तु गद्यमेव तत्र बुद्धिविलासजन्यताभावात् यथा - 'देवौ गृहं जग्मतुः'। इदं हि यथैव गद्यं तथैव पद्येऽपि। यथा - 'कार्यं निश्चितमासमाप्य मुदितौ देवौ गृहं जग्मतुः'। अस्यैव गद्यरूपं भवति -'निश्चितं कार्यं आसमाप्य मुदितौ देवौ गृहं जग्मतुः' इति। किन्त्वनेनैतन्नावधेयं यदन्वयाभावे एव पदानां गद्यमिति। गद्यपद्ययोः विभेदकतत्त्वं तु बुद्धिविलास एव। यत्र हि भाषायाः स्वाभाविकी गतिस्तद् गद्यमेव यत्र च श्रमप्रदत्ता गतिस्तदेव पद्यमिति।

ये गद्यं हि पद्यस्य व्याख्यात्मकं रूपमिति वदन्ति, तेषां तत् कथनं योग्यं न मन्यते विद्वद्भिः। वस्तुतस्तु गद्यादेव पद्यसम्भवः। चिन्तनीयः भवति अस्य सारः। कविर्यदेवानुभवति तदेव प्रथमं चेतसि मश्नाति। तावत्पर्यन्तं तस्यानुभवस्य गद्यमयं रूपमेव भवति। बहुधा पद्ये एव कोऽपि विचन्तयितुं न शक्नोति इति ख्यातिः। यदा तद्बहिः निष्क्रामयति, तदापि तस्य गद्यमयं रूपमेव भवति। पश्चाच्च कविस्तत् पद्ये निबध्नाति, पदैः सह सुचिरं क्रीडित्वा। तेन परापश्यन्ती-मध्यमावस्थायां वाचः स्वरूपे गद्यमयमेव भवति मौलिकम्।

वैखर्या अपि प्रथमचरणे तु तथैव भवति चरमचरणे एव पद्यमयं सम्भवति यदि वक्ता विचक्षणश्चेत्। तेन न हि गद्यं पद्यकाव्याल्लोककथामाध्यमेन विकसितं यथा हि पण्डितम्मन्याः कथयितुं चेष्टन्ते, नैव च संस्कृतं गद्यं ग्रीकगद्यात् प्रभावितं यथा कथ्यते। वस्तुतस्तु यदा भारतीयगद्यं स्वकीये सर्वोत्कृष्टसाहित्योद्याने -

'ऋतञ्च सत्यञ्चाभिध्यात्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रोऽअर्णवः। समुद्रादर्णवादधि संवत्सरोऽजायत', 'स हो वाच ऋग्वेदं भगवोऽध्येमि' इत्यादि रूपेण विहरति स्म, तदा ग्रीकपद्यं हि मेषपुच्छेऽपि संलग्नं नासीत्किमुत कविलेखन्याम्। यथार्थतात्वेतावत्येव यत्साहित्यस्य मौलिकं रूपं तु गद्यमयमेव पद्यं तु पश्चात्प्रभावातिशयेच्छया वा कण्ठस्थीकरणसौकर्याय प्रवर्तितं श्रमेण। संस्कृतगद्यसाहित्यं पद्यसाहित्यादपि प्राचीनतरम्। उक्तमेव पुराणेषु 'एक एव यजुर्वेदो व्यस्यते द्वापरादिषु' इति। यजुर्नाम अनियतवर्णावसानवागेव। यजुर्भ्य एव ऋग्जायत। ऋङ्नाम नियतवर्णावसाना वाक्। न केवलं यजुर्वेदस्य मौलिकं रूपमपि तु समग्रमेव ब्राह्मणसाहित्यम्-आरण्यकम्-उपनिषत्तत्त्वञ्च गद्य एव विद्यते। सूत्रमपि गद्यस्यैव संक्षिप्तं रूपं न तु पद्यस्य।

**प्रकारः**
गद्यकाव्यं हि द्विविधं कथा, आख्यायिका चेति। तत्र कथा हि कविकल्पितवस्तुपात्रादिविषया यथा बृहत्कथा। आख्यायिका तु ऐतिहासिकवृत्ताधारा। कथा हि स्वयं नायेकन वाऽन्येनापि कथिता भवति, यदा आख्यायिका तु स्वयं नायकेनैव कथिता भवति। आख्यायिका उच्छ्वासाख्येषु विभागेषु विभक्ता भवति। तत्र वक्त्रापरवक्त्रवृत्तप्रणीतपद्यान्यपि भवन्ति, किन्तु कथायां नैव। कथायां हि कन्याहरण-सङ्ग्राम-विप्रलम्भ-सूर्योदय-चन्द्रोदयप्रभृतिविषयाणां सुविस्तृतं वर्णनं भवति आख्यायिकायां नैव। संस्कृतगद्यकाव्ये यथासम्भवमेतेषां नियमानां पालनं कृतमेव दृश्यते। दण्डी कथयति यत्कथाख्यायिकयोः नैव तथा महत्त्वदर्शितो भेदः सम्भवति। ते हि गद्यकाव्यस्य द्वे संज्ञे एवेति। कोषकारस्त्वेवमाह - 'प्रबन्धकल्पना कथा'[१] 'आख्यायिकोपलब्धार्था'[२] बालरामायणम् "गद्यं कवीनां निकषं वदन्ति" इति निगदति। यः गद्यं तादृशं विलिख्य कविः इति प्रशंसितः भवति सः नितरां काव्यशास्त्रदोषज्ञानां विमर्शनिकषोपले निघृष्टसुवर्णाभरणोपमः सन् सहृदयैः नित्यं कण्ठे धार्यत एव। अत एवोक्तम् यथा-

पद्यं वद्यं गद्यं हृद्यम्। इति। अपि च -
अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥ इति वदन्ति।
किन्तु तादृशविश्वसृष्टौ समर्थाः कवयोऽपि विरला एव। विस्मयावहायां कविपरम्परावाहिन्यां संस्कृतसाहित्यसरस्वत्यां बाणभट्टसदृशाः गद्यं प्रणीय एव कविरितिविख्याताः न बहव उपश्रूयन्ते। यतः कस्यामपि भाषायां गद्यकाव्यनिर्मितिः न सुलभा। संस्कृते तु कठिनतरा। तथापि संस्कृतभाषायां गद्यकाव्यश्रीः विपुला दृश्यते। वेदेषु, उपनिषत्सु, विविधशास्त्रग्रन्थेषु च गद्यानां प्रयोगाः तत्तद्गहनतत्वप्रतिपादननैपुणीं दर्शयन्त्यपि गद्यसाहित्यस्तोमे नान्तर्भवन्ति। यतः तादृशगद्येषु यद्यपि शास्त्रप्रौढिमा, पाण्डित्यप्रकर्षश्च गोचरति, तथापि रसस्यन्दीनि वाक्यानि तत्र न भवन्ति। आचार्यःदिङ्नागः स्वस्य किरणावलिः नाम्नि ग्रन्थे उत्तमां गद्यसरणिं प्रादर्शयत्। जयन्तभट्टः न्यायमञ्जरी इति ग्रन्थे तत्र तत्र गद्यसुषमां शैलीमभिव्यनक्ति। किन्तु एतादृशेषु शास्त्रग्रन्थेषु शास्त्रप्रतिपाद्यविषयमात्रे प्रवृत्तं गद्यं न हि खलु काव्यप्रपञ्चं संवर्धयति।

**गद्यकाव्यानां प्राचीनता**
आचार्यः पतञ्जलिः महाभाष्ये "आख्यानकाख्यायिकेतिहासप्रकरणेभ्यश्च" इति वार्तिकस्य व्याख्यानप्रसङ्गे 'आख्यायिका वासवदत्तिका, सौमनोत्तरिका इति नामनिर्देशनपूर्वकम् उदाहृतवान्। एतेन ज्ञायते यत् क्रिस्तोः पूर्वकालादपि संस्कृते गद्यप्रकारे नैकानि काव्यानि आसन्निति। अत एव बाणेनोक्तम् यथा-

कवीनामगलद्दर्पो नित्यं वासवदत्तया।
शक्त्येवपाण्डुपुत्राणां गतया कर्णगोचरम् ॥ इति।
न चैषा वासवदत्ता सुबन्धुकृता भासते। काचित्ततोऽपि प्राक्तना महाभाष्योक्तैव वा भवेत्। तथैव बाणेनोक्तम् "भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते" इति यत् कोऽयं गद्यबन्ध इति न ज्ञायते। अपि च आचार्यदण्डिनोक्तौ -

तौ शूद्रककथाकारौ धन्यौ रामिलसोमिलौ।
काव्यं ययोर्द्वयोरासीत् अर्धनारीश्वरोपमम् ॥ इत्येतौ युग्मकवी दण्डिनोऽपि प्राचीनौ गद्यकारौ भाव्येते।
अपि च दण्डी हालराजेन पालितस्य श्रीलालिताख्यस्य "तरङ्गवती" नामानं गद्यग्रन्थम् उदाहरति।भोजः स्वस्य शृङ्गारप्रकाशः इति ग्रन्थे "मनोवती" "सातकर्णीहरणम्" इति नामकं गद्यग्रन्थद्वयं नाम्नोद्धरति। एतानि गद्यकाव्यानि प्राचीनानि सन्ति, इदानींतनकाले नोपलभ्यन्ते। एवं च समुपलब्धेभ्योऽपि गद्यकाव्येभ्यः प्राचीनतमाः गद्यकाव्यग्रन्था आसन्निति तु विज्ञायते।

गद्यकाव्यानि
समुपलब्धेषु गद्यकाव्येषु बाणकर्तृकं कादम्बरीनामकं सर्वप्रथमम्। एतत् काव्यं "प्रबन्धकल्पना कथा" इति कोशोक्तप्रकारेण कथाप्रकारे अन्तर्भवति। द्वितीयं च बाणकृतम् आख्यायिकाप्रकारे अन्तर्भूतं गद्यकाव्यं हर्षचरितम् इति। बाणकवेरपि पूर्वकालीनः गद्यकाव्यकर्ता सुबन्धुः। एतस्य कृतिः वासवदत्ता इति। महाकविः दण्डी दशकुमारचरितम् अवन्तिसुन्दरीकथा इति गद्यकाव्यद्वयं प्रणिनाय। ततः वामनभट्टबाणः नामा कविः वेमभूपालचरितम् नाम काव्यं व्यरचयत्। अष्टादश शतमानस्योत्तरार्धे आन्ध्रीयः महाविद्वान् लक्ष्मणसूरिः भारतसङ्ग्रहः नलोपाख्यानम् इति गद्यकाव्यद्वयं लिखितवान्। गते नवदशशतमाने औत्तरेयः अम्बिकादत्तव्यासः शिवराजविजयः नामानं गद्यग्रन्थं निरबध्नात्। तथा च पण्डिता क्षमा नाम्नी विदुषी "कथामुक्तावली" इति गद्यकथाग्रन्थं रमणीयगद्यग्रथनकौशलेन विरचितवतीति श्रुतम्। एवं च आसप्तमशतकादारभ्य वर्तमानकालपर्यन्तमपि महान्ति गद्यकाव्यानि गणयामश्चेत् तानि केवलम् अङ्गुलिगण्यान्येव भवन्तीति ज्ञायते। एतेन स्पष्टं भवति यत् संस्कृते हृद्यं गद्यं विरचयितुं "चापलाय प्रचोदितः" कोऽपि कविः न प्रभवति इति।

वासवदत्ता
मुख्यलेखः : वासवदत्ता
वासवदत्ता सुबन्धुप्रणीतं गद्यकाव्यमिति सर्वैरेव स्वीक्रियते। गद्यपरम्परायाः प्रप्रथमा एषा रचना इति विदुषां मतम्। गद्यरचनायां कवेः वैशिष्ट्यस्य प्रशंसा भवति, तेन सह तस्य पद्यकौशलम् अपि प्रशंस्यते।

बृहत्कथा
मुख्यलेखः : बृहत्कथा
बाणेन 'अतिद्वया कथा' इति स्मृतयोः कथयोर्मध्येऽपरा गुणाढ्यस्य बृहत्कथा। यद्यपि गुणाढ्यस्य बृहत्कथा मूलतः पैशाचीभाषायामासीत्तेनास्याः मौलिकरूपं कीदृशमासीदिति तु न कोऽपि वक्तुं समर्थस्तथापि बृहत्कथामञ्जरी-कथासरित्सागरादिवलाद्विषयेऽस्मिन् किञ्चिदुत्प्रेक्षितुं शक्यते। इदमपि कथ्यते यदस्य पूर्वे षड्भागास्तु विनष्टाः। उपलब्धस्तु सप्तमो भाग एव। बाणः हर्षचरिते कथयति -

समुद्दीपितकन्दर्पा कृतगौरीप्रसाधना।

हरलीलेव नो कस्य विस्मयाय बृहत्कथा॥ [३]

एवमेव सोड्ढलः -

'कविर्गुणाढ्यः स च येन सृष्टा बृहत्कथा प्रीतिकरी जनानाम्।

या संविधानेषु सुसन्धिबन्धैर्निपीड्यमानेव रसं प्रसूते।।'

कथ्यते गुणाढ्यः प्रतिष्ठानपुरस्य राज्ञः सातवाहनस्य सभापण्डित आसीत्। स व्याकरणशिक्षणावधौ शर्ववर्मणा कातन्त्रव्याकरणकारेण पराजितः संस्कृतं प्राकृतञ्चोभयीं वाचं समुत्सृज्य पैशाचीमाश्रित्य बृहत्कथां कृतवानिति। सातवाहनस्य

समयो विक्रमानन्तरप्रथमद्वितीयशतकान्तराले मतः। तेन गुणाढ्यस्यापि स्थितिः कालेनैवामुना संवादिता भाव्यमिति समालोचकाः। शकसंवत्सरप्रवर्तकः शालिवाहन एव सातवाहनः स्मृतोऽत्र पुरावृत्तविद्भिः।

एतन्निश्चयेन वक्तुमशक्यं यद्बृहत्कथा गद्यमयी किं वा पद्यमयी आसीदिति। कथासरित्सागरानुसारेण तु रचनैषा पद्यमयी दृश्यते यद्यपि तेन नैव स्पष्टमुक्तम्। कथितं तत्र

तथैव च गुणाढ्येन पैशाच्या भाषया तया।

निबद्धा सप्तभिर्वर्षैर्ग्रन्थलक्षाणि सप्त सा॥ [४] इति।

किन्तु बुधस्वामिनो बृहत्कथाश्लोकसङ्ग्रहादिमनुमीयते यद्ग्रन्थोऽयं गद्यमयः आसीदन्यथा 'श्लोकसङ्ग्रह' इति कथनं निरर्थकमेव स्यादिति। अनेन ध्वन्यते यदबृहत्कथायां बुधस्वामिना श्लोकबद्धरूपेण सङ्ग्रहः कृत इति, न तु मूलग्रन्थगतपद्यानां सङ्ग्रह इति। बृहती या कथा तस्याः श्लोके सङ्ग्रहः इत्यस्याशयः।

बृहत्कथायां हि काणभूतिकथिताः सप्तकथाः निबद्धाः आसन्। किन्तु तासु षट्कथास्तु आदावेव प्रणष्टा अन्तिमा एव नरवाहनकथाऽवशिष्टा इति कथासरित्सागरतो ज्ञायते। बृहत्कथामाश्रित्य त्रयो ग्रन्थाः प्रणीता दृश्यन्ते, नेपालदेशस्य बुधस्वामिनः बृहत्कथाश्लोकसङ्ग्रहः, काश्मीरस्य क्षेमेन्द्रस्य बृहत्कथामञ्जरी, काश्मीरस्यैव सोमदेवस्य कथासरित्सागरश्च।

हर्षचरितं, कादम्बरी च
मुख्यलेखः : हर्षचरितम्

,
मुख्यलेखः : कादम्बरी
बाणस्य हर्षचरितं, कादम्बरी च रचने स्तः। उभे रचने अपूर्णे। हर्षस्य निधनत्वात् हर्षचिरतम् अपूर्णमेव त्यक्तं बाणेन। ततश्च कादम्बर्याः रचनाकाले स्वयं कविः पार्थिवम् अत्यजत्। कादम्बर्याः प्रशंसा अनेकैः प्राचीनकविभिः, आधुनिककविभिः, विदेशीयविद्वद्भिः च कृता वर्तते।

दशकुमारचरितम्, अवन्तिसुन्दरीकथा
मुख्यलेखः : दशकुमारचरितम्
दशकुमारचरितं दण्डिनः प्रथितं गद्यकाव्यम्। दशानां कुमाराणामतिपौरुषपराक्रमवर्णनमेवाऽस्य ग्रन्थस्य विषयः। मगधेशकुमारस्य राजवाहनस्य तन्मित्राणां नवानां देशविदेशाटनानुभवानां मनोहारि वर्णनमत्र दृश्यते। अवन्तिसुन्दरीकथा दण्डिनोऽपरा कृतिः। ग्रन्थोऽयमपि हर्षचरितमिव कतिपयैः पद्यैरारभ्यते। अत्र बाणस्य कादम्बरी पुनरुक्तेव दृश्यते भाषाभाववर्ण्यविषयादिदृष्ट्या।

तिलकमञ्जरी
मुख्यलेखः : तिलकमञ्जरी
धनपालस्य तिलकञ्जरी समालोचकैः स्मृता। कविरसौ धारानरेशस्य मुञ्जस्य सभासदासीदिति तिलकमञ्जर्या एव साक्ष्येण ज्ञायते। सः रावदेवस्य पुत्रः आसीत्। १०३० मितवैक्रमाब्दमभितः प्रणीतेऽस्मिन् ग्रन्थे राजपुत्र्याः तिलकायाः राजपुत्रेण समरकेतुना सह प्रेमप्रपञ्चो वर्णितः। ग्रन्थस्य भूमिकाभागे हर्षचरित इव वाल्मीकि-व्यास-प्रवरसेन-जीवदेव-कालिदास-बाण-समरादित्य-भद्रकीर्ति-माघ-भार-विभवभूति-वाक्पति-राजशेखर-प्रभृतिकवयः स्मृता कविना। तथैव तत्र बृहत्कथा तरङ्गवती चेति द्वौ ग्रन्थावपि स्मृतौ। समालोचका ग्रन्थेऽस्मिन् स्पष्टमेव बाणच्छायां पश्यन्ति।

गद्यचिन्तामणिः
मुख्यलेखः : गद्यचिन्तामणिः
विक्रमानन्तरत्रयोदशशतकमभितः स्थितिमता वादीभसिंहापराभिधानेन ओड्यदेवेन गद्यचिन्तामणिसंज्ञकं काव्यं प्रणीतमस्ति। तत्र राजपुत्रस्य जीवनधरस्य चरितं चित्रितमस्ति। अस्यैव कवेः क्षत्रचूडामणिनामकं काव्यमप्यस्ति।

एवमेव अगस्त्यस्य (१३८० वै०) कृष्णचरितं, वामनभट्टबाणस्य (१४८० वै०) वेमभूपालचरितं वीरनारायणचरिताख्यं, अनन्तशर्मणः ( १७०७ वै० ) मुद्राराक्षसपूर्वसङ्कथानकं, विश्वेश्वरपाण्डेयस्य (१७५० वै०) मन्दारमञ्जरी, अम्बिकादत्तव्यासस्य (१९१५-१९५७ वै०) शिवराजविजयं, क्षमायाः (१९५७ वै०) कथामुक्तावली, रामशरणस्य (१९६२ वै०) कौमुदीकथाकल्लोलिनी, देवविजयगणिनो रामचरितं (१६५३ वै०), नृसिंहस्य अभिनवकादम्बरी, कृष्णपण्डितस्य रत्नावली, राजगोपालस्य (१९४९ वै०) शैवालिनी, कुमुदिनी, विलासकुमारी, सङ्गरः, कल्याणरामस्य कनकलता, कृष्णमाचार्यस्य मन्दारवती, अलवार-आयङ्गरस्य जयन्तिका, श्रीशैलस्य मेनका, नरसिंहाचार्यस्य सौदामिनी, मेधावतस्य कुमुदिनीचन्द्रं, वामनकृष्णस्य तिलकचरितं, बदरीनाथस्य गुणेश्वरचरितं चेतिप्रभृति गद्यकाव्यानि प्रथितानि स्मृतानि च सन्ति।

मन्दारमञ्जरी
मुख्यलेखः : मन्दारमञ्जरी
मन्दारमञ्जरी विश्वेश्वरपाण्डेय-महोदयेन रचितं किञ्चन नाट्यकाव्यम्। एषः ग्रन्थः कादम्बर्याः अनुकरणाय प्रयतते। धाराप्रवाहस्य विच्छेदः बहुत्र प्राप्यते, परन्तु कवेः वर्णनशैल्याः समालोचकाः प्रशंसां कुर्वन्ति। प्रेमप्रसङ्गाधारितं काव्यमिदम् अपूर्णमेव मन्यते।

रत्नावली
मुख्यलेखः : रत्नावली
१८४०-१९०० मितवैक्रमाब्दान्तराले स्थितिमतो धर्माधिकारिवंश्यस्य श्रीकृष्णपण्डितस्य रत्नावली आधुनिकगद्यकाव्येषु नृपायते। स्वरूपेण स्वल्पमपि पूर्णं काव्यमिदं सुखान्तम्। अत्र भगवतो रत्नेश्वरस्य प्रसादेन रत्नावल्या गन्धर्वकुमार्या रत्नचूडाख्येन नागराजकुमारेण सह परिणयो वर्णितः। सर्वैरेव काव्यगुणैः समलङ्कृतोऽयं ग्रन्थः सर्वदा मौलिकः अस्य दीर्घसमासवन्ति वाक्यानि बाणमेव स्मारयन्ति, श्लेषप्रयोगबहुलता च सुबन्धुं, पदलालित्यञ्च दण्डिनम्। दिङ्मात्रं निदर्शनं यथा -

'अस्ति स्वस्तिसमस्तस्थिरास्थलीविस्तृतमस्तकसंस्तुतप्रस्तारप्रशस्तिस्तोमाऽहर्दिवं वर्धमानाऽपूर्वपूर्वैहिकजन्यजतधर्मार्थकामनिर्वाणसम्पूर्णसर्ववर्णाश्रमधर्मकर्मप्रसितत्वखर्वगर्वखर्वीकृतसुपर्वदर्वीसुपर्वादिपवितैः • •• •••••• वाराणसी नाम।' (त्रिषु पृष्टेषु विस्तृतमिदं वाक्यम् )।

रत्नावलीवर्णनं यथा -

'तस्य सुविनया तनया लावण्यवंतीष्वग्रगण्या जितचन्दिरमुखारविन्दा स्तबर्कस्तनी मृणालकोमलबाहुलता तन्वी तनुमध्याऽधरीकृतबिम्बाधरा मीनाभिमानमोचनलोचना विकलीकृतकोकिलालापा सर्वनान्धर्वनिपुणा गुणरत्नगजानुपमेयरूपातिशया मर्तेव रत्नाकरकन्यका बभूव रत्नावली नाम।'

'या च सन्ध्येव विविधरागरक्ताम्बरा कवितेवालङ्कारमण्डिता तरुशाखेव रुचिरवयोभूषिता कलावत्यपि नकलावती गन्धयपि नगन्धर्वी। यस्याश्चञ्चलत्वं नयनयोर्न चेतसि, मन्थरत्वं पादयोर्न बुद्धौ, कार्यं बलग्ने न वपुषि, मौग्ध्यं शिशुक्रीडने न विद्यासु।'

शिवराजविजयः
मुख्यलेखः : शिवराजविजयः
१९१५-१९५७ मितवैक्रमाब्दान्तरालवर्तिना जयपुरोभिजनेन पाटलिपुत्रवास्तव्येन अम्बिकादत्तव्यासेन सन्त्यनेके ग्रन्थाः प्रणीता येषु शिवराजविजयं नाम गद्यमहाकाव्यं प्रसिद्धमस्ति।

शिवराजविजयम् ऐतिहासिकवृत्ताभितत्वादाख्यायिकारूपं गद्यकाव्यम्। अत्र द्वादशनिःश्वासेषु शिवाजीवरस्य साहसिकं कार्यं वर्णितमस्ति। शिवाजीवीरः १६७४ मितवैक्रमाब्दे जातः महाराष्ट्रवीरः १७३१ मितवैक्रमाब्देऽभिषिक्तः १७३७ मितवैक्रमाब्दे शरीरम् अत्यजत्। तेन १७०३ मितवैक्रमाब्दतः आरभ्य आजीवनमेव महाराष्ट्रस्य मुगलशासनान्मुक्तये सङ्घर्षः कृतः। सः सामान्यजनतः स्वबाहुवीर्येण महाराष्ट्रसम्राट् सञ्जातः। तस्यैव चरितं ग्रन्थेऽस्मिन् सुनिपुणं वर्णितमस्ति। कथ्यते अस्मिन् वङ्गीयोपन्यासग्रन्थस्य प्रभावो दृश्यते किन्तु कथा त्वैतिहासिकी सर्वसामान्यैव। वस्तुतः कविरत्र नवीनां शैलीमप्युन्नयति

तेनैष भ्रमः समुत्पन्न। ग्रन्थेऽस्मिन् वीरः मुख्यो रसः, वैदर्भीरीतिः, प्रासादिकी मधुरा च शैली। अस्य वर्णनशैल्या दिङमात्रमुदाहरणं यथा -

'एष भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचरचक्रस्य कुण्डलमाखण्डलदिशः दीपको ब्रह्माण्डभाण्डस्य प्रेयान् पुण्डरीकपटलस्य शोकविमोकः कोकलोकस्य अवलम्बो, रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य इनश्च दिनस्य।

कौमुदीकथाकल्लोलिनी
मुख्यलेखः : कौमुदीकथाकल्लोलिनी
१९६२ मितवैक्रमाब्दे लब्धजनुः रामशरणः संस्कृतगद्यकाव्याकाशस्यान्तिमनक्षत्रम् मन्यते। यद्यपि तदनन्तरमपि गद्यकाव्यकानि प्रणीतानि तु दृश्यन्ते तथापि कौमुदीकथाकल्लोलिनीसमकक्षी रचना हृदयाह्लादकी मन्यते। अत्र उदयनपुत्रस्य मरवाहनदत्तस्य जन्मत आरभ्य गान्धर्वाभिषेकपर्यन्ता कथा वर्णिताऽस्ति। शास्त्रकाव्यपरम्परायाः अपि पालकेऽस्मिन् काव्ये कथामाध्यमेन व्याकरणप्रयोगा अपि शिक्षिता भट्टिकाव्ये इव। तेन काव्यमिदं कवित्व-पण्डितत्वयोः सुन्दरं सङ्गमस्थलम् मन्यते।

कादम्बरी

बाणभट्टः गद्यकाव्यस्य अप्रतिमः कविर्विद्यते। अस्य हर्षचरितम् (आख्यायिका) कादम्बरी (कथा) च अतिप्रसिध्दे वर्तेते। पदानामुचितप्रयोगः भावानाम् आर्जवम्, उपमाश्लेषपरिसंख्या –उत्प्रेक्षा- रुपकविरोधाभासः – समासोक्तिः –प्रभृतीनाम्, अलङ्काराणां स्वाभाविकसमावेशः, देशकालपात्रानुसारिभाषायाः मञ्जुलसन्निवेशः, पाञ्चालीरीतिश्च कादम्बरीं विहाय अन्यत्र नावलोक्यते।

अत्र राज्ञः शूद्रकस्यवर्णनम्, चाण्डालकन्यावर्णनम्, जाबालिवर्णनम्, विन्ध्याटविवर्णनम्, महाश्वेतावर्णनम्, आच्छोदसरोवरवर्णनम्, चन्द्रापीडस्य दिग्विजयवर्णनमित्यादीनि मनोज्ञानि वर्णनानि, वीक्ष्य केनचित् उक्तम्- वाणी बाणो बभूव। गद्यकाव्येषु कादम्बर्याः सर्वेत्तमं स्थानमास्ते। शास्त्रीयपाण्डित्यदृष्ट्या विषयाणां व्यापकतायाश्च दृष्ट्या अनुपमेयकथाग्रन्थोऽयं विद्यते। भावपक्ष –कलापक्ष- लोकचरित्र –शास्त्रीयतत्त्वसन्निवेश-बाह्यजगत्-प्रभ्रुतीनां वर्णने कवेः सूक्ष्मातिसूक्ष्म दृष्टिः सर्वत्रैव राजते।

कादम्बरी बाणस्य सर्वेत्कृष्टा रचनाऽस्ति। अस्याः कथा कौतूहलपूर्णा अस्ति। पठनसमये पाठकानां कौतूहलमुत्तरोत्तरं वर्धते एव। बाणस्य सर्वोत्कृष्टां शैलीं विलोक्यैव केचिदूचिरे बाणोच्छिष्टं जगत्सर्वम् इति। विषये अस्मिन् सर्वप्रथममत्र बाणस्य कवित्वशक्तिं, गद्यवैशिष्टं वा पर्यालोचयामः। कस्याचिदपि कवेः प्रतिभासमीक्षणाय, तस्य काव्यस्य कलापक्षं, हृदयपक्षं, वर्णनशैलीं च द्रष्टव्यम्।

अन्तर्विषयाः
१ कलापक्षः
२ हृदयपक्षः
३ शैली
४ बाह्यसम्पर्कतन्तुः

कलापक्षः
बाणस्य प्रकृतिवर्णनं सौम्यं रुचिरञ्चास्ति। वर्णनेषु सजीवतामानेतुं बाणः उपमोत्प्रेक्षा- श्लेष- विरोधाभास परिसंख्यालङ्काराणामाश्रयं गृहीतवान्। तत्रापि परिसंख्यालङ्कारस्य तु बाणः सम्राडिति नात्र संशयः। श्लिष्टपरिसंख्यायाः ईदृशं चमत्कारपूर्णवर्णनं न कोऽपि कविः कृतवान्। आदर्श-गद्यस्य यादृशं स्वरुपं सिध्दान्तं वा बाणेन हर्षचरिते वर्णितं तादृशमेव गद्यं कादम्बर्यां प्रस्तुतम्।

हृदयपक्षः

बाणस्य हृदयपक्षोऽपि सर्वोत्कृष्टः विद्यते। मानवीय नानाभावाभिव्यक्तौ विविधानां कोमलमनोभावानां मार्मिकविश्लेषणे बाणोऽद्वितीयः कविरिति निश्चप्रचम्। पात्रस्य मनोदशायाः विस्तृतं सजीवं विशदञ्च वर्णनं बाणस्य प्रतिभां विस्तारयति। बाणस्य गद्येषु रसस्याजस्रः प्रवाहः प्रवहति। महाश्वेतायाः प्रणयवर्णने, कादम्बर्याः साक्षात्कारे च मनोदशायाः यादृशं चित्रणं बाणेन प्रस्तुतं, तादृशं चित्रणां सयत्नान्वेषणेनापि संस्कृतसाहित्ये न दृश्यते। महाश्वेतायाः विलापः, कादम्बर्याः विरहवर्णनं च विप्रलम्भश्रृङ्गारस्योत्कृष्टे निदर्शने स्तः। वस्तुतस्तु बाणस्य गद्यं पञ्चानन इव सिंहगर्जनां कुर्वन् चलति। क्वचित् भयध्वनिं कुर्वती नदीव महावेगेन प्रवहति, कुत्रापि च शरत्कालीना नदीव शनैः शनैः प्रवहमाना कामपि अपूर्वां शोभां कलयति।

शैली

बाणस्य शैली द्विविधा दृश्यते। वनस्य वर्णनेषु बहुधा सजीवतामानेतुं समासबहुलायाः तथौजोगुणमण्डितायाः आश्रयं गृहणाति कविः। एवंविधस्थलेषु समासगतछटा दर्शनीया भवति। विन्ध्याटव्याः वर्णने सन्ध्यायाः वर्णने च एवं विधायाः शैल्याः प्रयोगं कृत्वा सजीवनाद्यं प्रस्तौति। विरह –वर्णने वार्तालापावसरे च बाणः प्रसादगुणगुम्फितां शैलीमधिकृतवान्। एवं प्रकारेण बाणः आवश्यकतानुसारं शैलीं परिवर्त्य वर्णने प्राणास्पदं सञ्जीवनं दत्त्वा गद्यं निर्माति। श्रीराजशेखरेण पाञ्चालीरीतेः निदर्शना बाणस्य शैलीति कथिता –

शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते।
शिलाभट्टारिका वाचि बाणोक्तिषु च सा यदि ॥

कादम्बरी प्रश्नोत्तरी - 150 महत्वपूर्ण प्रश्न

कादम्बरी वाणभट्ट द्वारा रचित संस्कृत साहित्य का महान उपन्यास है। बाणभट्ट राजा हर्षवर्धन के दरबार की शोभा बढ़ाया करते थे। उन्होंने हर्षवर्धन के राज्य और उस समय का वर्णन करते हुए प्रतिष्ठित रचना 'हर्षचरित' भी लिखी थी। राजा हर्षवर्धन स्वयं भी संस्कृत के विद्वान हुआ करते थे और उन्होंने 'नागनन्द', 'रत्नावली' और 'प्रियदर्शिका' जैसी रचनाएं संस्कृत में लिखी थीं। 'कादम्बरी' दो प्रेम कहानियों का मिश्रण है। इसका यह नाम कहानी की नायिका कादम्बरी के नाम पर दिया गया है। कादम्बरी को चन्द्रपीड और महाश्वेता को पुण्डरीक से प्रणय हुआ है और पूरी कहानी इसी के इर्द-गिर्द घूमती है। यह कहानी कई जन्मों की है जिसमें एक जन्म में किये गए अच्छे-बुरे कर्मों का फल अगले जन्म में मिला है।

कादम्बरी से संबंधित महत्वपूर्ण प्रश्न उत्तर संग्रह यहां देखें–

1. अन्वयः का अर्थ क्या है – संतान
2. आश्रम किसका था? – जाबालि ऋषि का
3. इंद्रायुध पूर्वजन्म में कौन था? – पुण्डरीक का मित्र कपिंजल
4. इस घटना के समय उसके पिता की क्या अवस्था थी? – अतिवृद्ध
5. उज्जयनी के राजा कौन है? – तारापीड
6. कादंबरी कथा का प्रधान नायक कौन है? – चन्द्रापीड
7. कादंबरी कथा का प्रारंभ कब से होता हैं? – शूद्रक वर्णन से
8. कादंबरी का मंगलाचरण क्या हैं – नमस्कारात्मक
9. कादंबरी का मुख्य रस क्या है? – श्रृंगार रस
10. कादंबरी की सहनायिका कौन हैं? – महाश्वेता
11. कादंबरी के मंगलाचरण में कौन-सा छन्द हैं? – वंशस्थ
12. कादम्बरी कथा किसकी है? – कल्पना प्रसूत
13. कादम्बरी कथा मे वर्णन क्या है? – तीन जन्मो का
14. कादम्बरी का अनुचर क्या है? – केयूरक
15. कादम्बरी का अर्थ क्या है? – सुरा या मदिरा
16. कादम्बरी का शाब्दिक अर्थ क्या है? – मदिरा
17. कादम्बरी का पात्र किसकी है? – पत्रलेखा की
18. कादम्बरी का प्रधान रस क्या है? – श्रृंगार रस
19. कादम्बरी का प्रमुख पात्र कौन है? – चन्द्रापीड

20. कादम्बरी का स्रोत क्या है? – बृहत्कथा
21. कादम्बरी की कथा कहाँ से ली गई है? – गुणाढ्य की बृहत्त कथा
22. कादम्बरी की माता का नाम क्या है? – मदिरा
23. कादम्बरी की विधा क्या है? – कथा
24. कादम्बरी की सहचरी कौन हैं? – मदलेखा
25. कादम्बरी के अनुचर का क्या नाम है? – केयूरक
26. कादम्बरी के कितने भाग है? – 2
27. कादम्बरी के प्रारम्भ में कितने पद हैं? – 20, 13 में कथा प्रशंसा
28. कादम्बरी के मंगलाचरण में किसकी स्तुति की गई है? – त्रिगुणात्मक ब्रह्म की
29. कादम्बरी के मंगलाचलण मे कितने श्लोक हैं? – 20
30. कादम्बरी के माता पिता का क्या नाम है? – मदिरा और चित्ररथ
31. कादम्बरी के लेखक कौन हैं? – बाणभट्ट
32. कादम्बरी में कथा वर्णित किसकी है? – चन्द्रापीड की
33. कादम्बरी में सरोवर का वर्णन किसका है? – अच्छोद सरोवर का
34. किसके तीन जनमो का वर्णन हैं? – चन्द्रापीड
35. कुबेर का समय क्या निश्चित किया गया है? – 450-430
36. कुबेर के कितने पुत्र थे? – 4
37. कुबेर के पिता का क्या नाम था? – वात्स्यायन
38. कुबेर ने सरलता से किसे जीत लिया था? – स्वर्ग को
39. कुलीरा का अर्थ क्या है? – केकड़ा
40. कौन राजा सिद्धादेश होता है? – उन्मत्तः
41. गद्यकाव्य के कितने भेद हैं? – 2, कथा आख्यायिका
42. गुरू का उपदेश क्या है? – जलविहीन
43. घटिका शतक उपाधि किसे दी गई है? – अम्बिकादत्त व्यास
44. चन्द्रापीड की सेविका का क्या नाम है? – पत्रलेखा
45. चन्द्रापीड के घोड़े का क्या नाम है? – इंद्रायुध
46. चन्द्रापीड के पिता का नाम क्या है? – तारापीड
47. जाबालि के पुत्र का नाम क्या है? – हारीत
48. तात का अर्थ क्या है? – पिता, पुत्र, पूजनीय
49. तारापीड की पत्नि कौन थी? – विलासवती
50. तारापीड की राजधानी का क्या नाम है? – उज्जयिनी
51. तारापीड राजा किसका है? – उज्जयिनी का
52. तारिलिका किस की सहचरी है? – महाश्वेता की
53. धन सम्पति का भयंकर मद कब तक शांत नही होता? – अंतिम अवस्था तक
54. पत्रलेखा किसकी पुत्री है? – कुलुताधिपति
55. पत्रलेखा पूर्वजन्म में कौन थी? – रोहिणी
56. पारिजात पल्लव से लक्ष्मी क्या ग्रहण करती हैं? – राग
57. पुण्डरीक के पिता का नाम क्या है? – श्वेतकेतु
58. पुण्डरीक के माता पिता का क्या नाम है? – लक्ष्मी और श्वेतकेतु
59. प्राचीनतम गद्य का उदाहरण कहां मिलता है? – कृष्ण यजुर्वेद की तैत्तिरीय सहिंता में
60. प्रीतिकूट किस नदी के तट पर था? – हिरन्यवाह या शोणनाद
61. बाण की पत्नी किसकी बहन थी? – मयूर भट्ट
62. बाण की बहन का क्या नाम था? – मालती
63. बाण के पिता कितने भाई थे? – 11
64. बाण के पूर्वजों का निवास कहां था? – प्रीतिकूट नामक ग्राम
65. बाण के लिए वाणी वाणों बभूव किसने कहा है? – गोवर्धनाचार्य

66. बाणभट्ट का वंश किससे प्रारम्भ होता है? – दधीच तथा सरस्वती के पुत्र
67. बाणभट्ट का समय हिंसात्मक शताब्दी। बाणभट्ट की रीति क्या है? – पांचाली
68. बाणभट्ट की बहिन का नाम क्या है? – मालती
69. बाणभट्ट के अनुसार सज्जन पुरुष श्रेष्ठ वचनों से किसके समान मन हरण करते हैं? –मणि नूपुरों सदृश
70. बाणभट्ट ने अपने गुरु का क्या नाम बताया है? – भर्तु (भत्सु)
71. बाणभट्ट शैव कौन थे – शिव के उपासक
72. बाणस्तु पंचानन किसने कहा है? – श्रीचंद्रदेव
73. बिना मेदोदोष के गुरुत्व उत्पन्न करने वाला कौन है? – गुरुपदेश
74. महापाप कितने है? – 5
75. महाश्वेता का आश्रम कौन-सा है? – अच्छोद सरोवर
76. महाश्वेता की सहचरी का नाम क्या है? – तरलिका
77. राजप्रकृतिः में कौन-सा समास है? – षष्ठी तत्पुरुष
78. राजप्रकृति कैसी होती है? – विह्वला
79. लक्ष्मी निष्ठुरता का गुण किससे प्राप्त किया? – कौस्तुभमणि
80. लक्ष्मी साधु भाव की क्या है? – बाध्यशाला
81. लक्ष्मीमद : शब्द कहाँ का है? – शुकनासोपदेश का
82. वात्स्यायन वंश में कौन ब्राह्मण हुए? – कुबेर
83. विट का अर्थ क्या है? – धूर्त
84. विदिशा किस नदी के किनारे स्थित है? – वेत्रवती
85. वृक्ष किस सरोवर के निकट था? – पम्पा पद्म सरोवर
86. वेशम्पायन की माता का क्या नाम है? – मनोरमा
87. वेशम्पायन को किसने पानी पिलाया? – हारीत ने
88. वैशम्पायन को किस आश्रम में लाया गया? – जाबालि ऋषि के
89. वैशम्पायन को किसने उठाया? – हारीत ने
90. वैशम्पायन को घोंसले से नीचे किसने गिराया था? – शबर सेनापति ने
91. वैशम्पायन जब आश्रम में लाया गया तब कौन सी ऋतु थी? – ग्रीष्म
92. वैशम्पायन पूर्व जन्म में क्या था? – पुण्डरीक
93. शबर किस अवस्था का था? – युवावस्था
94. शबर के चले जाने पर शुक को किसकी अनुभूति हुई? – प्यास की
95. शुक का क्या नाम था? – वैशम्पायन
96. शुक किस वृक्ष पर रहता था? – शाल्मली
97. शुक शबर की दृष्टि से कैसे बचा? – शाल्मली की जड़ों में छिपकर
98. शुकनसोपदेश में उपदेश कौन देता है? – शुकनाश
99. शुकनाश किसे उपदेश देता है? – चन्द्रापीड
100. शुकनाशोपदेश किस ग्रन्थ का अंश है? – कादम्बरी का
101. शुकनाशोपदेश में मंत्री कौन है? – शुकनाश
102. शुकनाशोपदेश में मुख्य रूप से किसका वर्णन है? – लक्ष्मी का
103. शुकनास की पत्नी का क्या नाम है? – मनोरमा
104. शुकनास ने चंद्रापीड के लिये कौन सा शब्द प्रयोग किया? – तात
105. शुकनासोपदेश कादम्बरी का एक प्रकरण मात्र है
106. शुकनासोपदेशः में कौन समास है? – बहुब्रीही समास
107. शूद्रक की राजधानी का क्या नाम है? – विदिशा
108. शूद्रक की सभा में शुक लेकर कौन आया? – चांडाल कन्या
109. शूद्रक पूर्व जन्म में क्या था? – चन्द्रापीड
110. समुद्र मंथन में कितने रत्न निकले? – 14
111. समुद्र मंथन में लक्ष्मी सहित कितने रत्न निकले थे? – 14

112. ह्वेनशांग किस काल में में भारत में रहा? – 629-645
113. सूर्यशतकं किसकी रचना है? – मयूर भट्ट
114. सोडढल ने बाण के लिए क्या कहा है? – बाणः कविनामिह चक्रवर्ती
115. हर्षवर्धन का काल क्या है? – 606-648
116. हर्षवर्धन के समय कौन विदेशी भारत भ्रमण पर आया? – ह्वेनसांग
117. हारीत कौन था? – जाबालि का पुत्र

## शुकनासोपदेश प्रश्नोत्तरी

*प्रश्न )* *शुकनासोपदेश के रचनाकार कौन हैं ?*
(क) कालिदास (ख) सुबन्धु (ग) भवभूति (घ) बाणभट्ट

उत्तर है-बाणभट्ट*
*प्रश्न )* *शुकनासोपदेश का आधार ग्रन्थ क्या है ?*
(क) दशकुमारचरित (ख) शिवराजविजय (ग) कादम्बरी (घ) रामायण

उत्तर :- *कादम्बरी*
*प्रश्न )* *कादम्बरी के लेखक कौन हैं ?*
(क) भवभूति (ख) भास (ग) बाण (घ) कालिदास

उत्तर :- *बाण* ✔
*प्रश्न )* *शुकनास कौन था ?*
(क) मंत्री (ख) राजा (ग) दरबारी (घ) पुरोहित
उत्तर :- *मंत्री* ✔

*प्रश्न )* *शुकनास किस राजा का मंत्री था ?*
(क) चन्द्रापीड (ख) चित्ररथ (ग) कुलुतेश्वर (घ) तारापीड
उत्तर :- *तारापीड* ✔
*प्रश्न )* *चन्द्रापीड किसका पुत्र था ?*
(क) चित्ररथ (ख) तारापीड (ग) श्वेतकेतु (घ) शुकनास
उत्तर :- *तारापीड* ✔
*प्रश्न )* *शुकनास के पुत्र का क्या नाम था ?*
(क) कपिंजल (ख) तारापीड (ग) वैशम्पायन (घ) चन्द्रापीड
उत्तर :- *वैशम्पायन* ✔
*प्रश्न )* *शुकनास की पत्नी का क्या नाम है ?*
(क) विलासवती
(ख) लक्ष्मी
(ग) मदिरा
(घ) मनोरमा
उत्तर :- *मनोरमा* ✔
*प्रश्न )* *शुकनासोपदेश में तात शब्द से कौन किसको सम्बोधित करता है ?*
(क) चन्द्रापीड,शुकनास से
(ख) शुकनास,तारापीड से
(ग) शुकनास,चन्द्रापीड से
(घ) चन्द्रापीड से तारापीड से
उत्तर :- *शुकनास,चन्द्रापीड से* ✔
*प्रश्न )* *समुद्रमंथन में लक्ष्मी सहित कितने रत्न निकले थे ?*
(क) 8 (ख) 14 (ग) 21 (घ) 7
उत्तर :- *14* ✔
*प्रश्न )* *लक्ष्मी की उत्पत्ति कहाँ से हुई ?*
(क) चन्द्रमा से
(ख) ब्रह्मा के मुख से

(ग) सागर से
(घ) विष्णु से
उत्तर :- *सागर से* ✔
*प्रश्न )* *चन्द्रापीड किस कोटि का नायक है ?*
(क) धीरोधत्त
(ख) धीरोदात्त
(ग) धीरललित
(घ) धीरप्रशान्त
उत्तर :- *धीरोदात्त* ✔
*प्रश्न )* *भत्सु किसका नाम है ?*
(क) बाण के गुरु का
(ख) कोई नही
(ग) चन्द्रापीड के गुरु का
(घ) तारापीड के गुरु का
उत्तर :- *बाण के गुरु का* ✔
*प्रश्न )* *कादम्बरी को अतिद्वयी किसने कहा है ?*
क) बाण ने
(ख) गोवर्धनाचार्य ने
(ग) शुकनास ने
(घ) चन्द्रापीड ने
उत्तर :- *बाण ने* ✔
*प्रश्न )* *शूद्रक की राजधानी का नाम क्या है ?*
(क) विदिशा
(ख) वेत्रवती
(ग) उज्जयिनी
(घ) विंध्याटवी
उत्तर :- *बाण ने* ✔
*प्रश्न )* *शूद्रक की राजधानी का नाम क्या है ?*
(क) विदिशा
(ख) वेत्रवती
(ग) उज्जयिनी
(घ) विंध्याटवी
उत्तर :- *विदिशा* ✔
*प्रश्न )* *तारापीड की राजधानी का क्या नाम है ?*
(क) उज्जयिनी
(ख) विदिशा
(ग) मगध
(घ) विंध्याटवी
उत्तर :- *उज्जयिनी* ✔
*प्रश्न )* *पत्रलेखा पूर्वजन्म में कौन थी ?*
(क) लक्ष्मी
ख) कोई नही
(ग) ताम्बूलवाहिनी
(घ) रोहिणी
उत्तर :- *रोहिणी* ✔
*प्रश्न )* *चन्द्रापीड की सेविका कौन है ?*
(क) चांडालकन्या
(ख) पत्रलेखा
(ग) लक्ष्मी
(घ) मदलेखा
*पत्रलेखा*
*प्रश्न )* *इन्द्रायुद्ध कौन है ?*
(क) चन्द्रापीड का सेवक
(ख) चन्द्रापीड का सखा

(ग) कोई नही
(घ) चन्द्रापीड का घोड़ा
उत्तर :- *चन्द्रापीड का घोड़ा* ✔
*प्रश्न )* *इन्द्रयुद्ध पूर्वजन्म में कौन था ?*
(क) सेवक
(ख) घोड़ा
(ग) पुण्डरीक का मित्र कपिंजल
(घ) कोई नही
उत्तर :- *पुण्डरीक का मित्र कपिंजल* ✔
*प्रश्न )* *गौरी और हंस किसके माता पिता हैं ?*
(क) मदलेखा के
(ख) पत्रलेखा के
(ग) महाश्वेता के
(घ) कादम्बरी के
उत्तर :- *महाश्वेता के* ✔

-

*प्रश्न )* *तरलिका कौन है ?*

(क) कादम्बरी की सहचरी

(ख) कादम्बरी की सेविका

(ग) महाश्वेता की सहचरी

(घ) महाश्वेता की सेविका

उत्तर :- *महाश्वेता की सहचरी* ✔ *प्रश्न )* *मदिरा और चित्ररथ किसके माता पिता हैं ?*
(क) पत्रलेखा के
(ख) मदलेखा के
(ग) महाश्वेता के
(घ) कादम्बरी के
उत्तर :- *कादम्बरी के* ✔ *प्रश्न )* *मदलेखा किसकी सहचरी है ?*
(क) महाश्वेता की
(ख) कोई नही
(ग) कादम्बरी की
(घ) तर लिका की
उत्तर :- *कादम्बरी की* ✔ *प्रश्न )* *केयूरक किसका अनुचर है ?*
(क) चन्द्रापीड का
(ख) कादम्बरी का
(ग) चित्ररथ का

(घ) महाश्वेता का
उत्तर :- *कादम्बरी का* ✔ *प्रश्न )* *पुण्डरीक के माता पिता कौन हैं ?*
(क) मदिरा श्वेतकेतु
(ख) मदिरा चित्ररथ
(ग) लक्ष्मी चित्ररथ
(घ) लक्ष्मी श्वेतकेतु
उत्तर :- *लक्ष्मी श्वेतकेतु* ✔
*प्रश्न )* *वाणी बाणों बभूव...... किसने कहा है ?*
(क) मल्लीनाथ ने
(ख) श्रीचन्द्रदेव
(ग) गोवर्धनाचार्य
(घ) सोढल
उत्तर :- *गोवर्धनाचार्य* ✔
*प्रश्न )* *विदिशा किस नदी के किनारे है ?*
(क) नर्मदा
(ख) गोदावरी
(ग) निर्विन्ध्या
(घ) वेत्रवती
उत्तर :- *वेत्रवती* ✔
*प्रश्न )* *कितने दीपों से अलंकृत पृथ्वी को पुनः जीतने के लिए चन्द्रापीड को शुकनास निर्देश देता है ?*
(क) 6
(ख) 14
(ग) 7
(घ) 8
उत्तर :- *7* ✔ *प्रश्न )* *सज्जनता की वधशाला क्या है ?*
(क) लक्ष्मी
(ख) अशिक्षा
(ग) मद
(घ) कोई नही
उत्तर :- *लक्ष्मी* ✔
*प्रश्न )* *न परिचय रक्षति.......किसके लिए कहा गया है ?*
(क) विलासवती
(ख) कादम्बरी
(ग) लक्ष्मी
(घ) कोई नही
उत्तर :- *लक्ष्मी* ✔
*प्रश्न )* *शुकनास ने अनार्या किसे कहा है ?*
(क) लक्ष्मी
(ख) कोई नही
(ग) राजधानी
(घ) धन रूपी मद
उत्तर :- *लक्ष्मी* ✔
*प्रश्न )* *कामरूपी हाथी के लिए कदलीवन किसे कहा गया है ?*
(क) मन्त्रणा को
(ख) अविद्या को
(ग) यौवनावस्था को
(घ) लक्ष्मी को
उत्तर :- *लक्ष्मी को* ✔
*प्रश्न )* *उपदेश सरलता से किसमें प्रवेश कर जाते हैं ?*
(क) शिक्षित मन मे
(ख) अशांत मन मे
(ग) तपस्वी मन मे
(घ) स्वच्छ मन मे
उत्तर :- *स्वच्छ मन मे* ✔

*प्रश्न )* *अंतिम् अवस्था मे भी शांत न होने वाला क्या होता है ?*
(क) गुरु का उपदेश
(ख) कोई नही
(ग) युवावस्था
(घ) लक्ष्मी का मद
उत्तर :- *लक्ष्मी का मद* ✔
*प्रश्न )* *विषयभोग की मृगतृष्णा होती है ?*
(क) गुरूपदेश से दूर ले जाने वाली
(ख) इन्द्रियों का हरण करने वाली
(ग) ज्ञान देने वाली
(घ) सुखों को हरने वाली
उत्तर :- *इन्द्रियों का हरण करने वाली* ✔
*प्रश्न )* *लब्धआपि दुःखेन परिपाल्यते.......किसके लिए आया है ?*
(क) युवावस्था के लिए
(ख) चांडालकन्या के लिए
(ग) कोई नही
(घ) लक्ष्मी के लिए
उत्तर :- *लक्ष्मी के लिए* ✔
*प्रश्न )* *शूद्रक का प्रधानमंत्री कौन है ?*
(क) कुमार
(ख) वैशम्पायन
(ग) वर्णन नही
(घ) कुमारपालित
उत्तर :- *कुमारपालित* ✔
*प्रश्न )* *शुकनास के उपदेश के पश्चात प्रसन्न हृदय वाला चन्द्रापीड कहाँ गया ?*
(क) राजदरवार
(ख) उद्यान
(ग) वन
(घ) अपने भवन
उत्तर :- *अपने भवन* ✔
*प्रश्न )* *कौस्तुभमणि को कौन धारण क्रता है ?*
(क) इंद्र
(ख) शिव
(ग) ब्रह्मा
(घ) विष्णु
उत्तर :- *विष्णु* ✔
*प्रश्न )* *कादम्बरी शब्द का क्या अर्थ है ?*
(क) अप्सरा
(ख) मदिरा
(ग) भीरु स्त्री
(घ) कदम्ब धारिणी
उत्तर :- *मदिरा* ✔
*प्रश्न )* *बिना जल वाला स्नान किसे कहा गया ?*
(क) धूप स्नान
(ख) मन्त्र स्नान
(ग) गुरूपदेशरूपी स्नान
(घ) मानसिक स्नान
उत्तर :- *गुरूपदेशरूपी स्नान* ✔
*प्रश्न )* *पातालगुहेव तमोबहुला क: ?*
(क) कोई नही
(ख) युवावस्था
(ग) लक्ष्मी
(घ) स्त्री
उत्तर :- *लक्ष्मी* ✔

*प्रश्न )* *..............भीमसाहसैकहार्यहृदया ?*
(क) हिडिम्बेब
(ख) पातालगुहेव
(ग) गङ्गेव
(घ) कोई नही
उत्तर :- *हिडिम्बेब* ✔
*प्रश्न )* *असिधारासु निवसति क: ?*
(क) कोई नही
(ख) लक्ष्मी
(ग) राज प्रकृति
(घ) युवावस्था
उत्तर :- *लक्ष्मी* ✔
*प्रश्न )* *..................अपवित्रमिव न स्पृशती ?*
(क) गुणवंतम्
(ख) कोई नही
(ग) सुजन
(घ) उदार सत्मम्
उत्तर है- *गुणवंतम्*
*प्रश्न )* *त्रिभुवनप्रसवभूमिरिव किसकी बिशेषता है ?*
(क) लक्ष्मी
(ख) विदिशा
(ग) विलासवती
(घ) उज्जयिनी
उत्तर :- *विदिशा* ✔
*प्रश्न )* *सुभट का अर्थ है ?*
(क) योद्धा
(ख) वीरपुरुष
(ग) कोई नही
(घ) वीरता
उत्तर :- *योद्धा* ✔
*प्रश्न )* *कादम्बरी के प्रारम्भ मे कितने श्लोक है ?*
(क) 25
(ख) 19
(ग) 22
(घ) 20
उत्तर :- *20* ✔
*प्रश्न )* *राहु की जिह्वा किसे कहा गया है ?*
(क) लक्ष्मी
(ख) युवावस्था
(ग) रात्रि
(घ) हिडिम्बा
उत्तर है- *लक्ष्मी*

For more salutations please visit -

https://www.blogger.com/email-post.g?blogID=7305833143351897939&postID=4310548938704730635